# विवेकस्तुतिः

सुमन्तपात्रः*

याम्यहं सम्प्रति त्वं कदा यास्यसि?
'यामि काले' ह्यहं मण्डले सन् हसन्।
योऽब्रवीदुत्तरं सादरं तं शिशुं
स्तौमि सप्तर्षिमूर्धन्यभूतं हि तम्॥१॥

यः कदम्बात्तरोः शैशवे लम्बते
नास्ति भीतिर्यतो ब्रह्मदैत्याद् ह्यपि।
अश्वतो धावतो यः पपौ बालकं
वन्द्यतेऽसौ बिलेनामधारी शिशुः॥२॥

यो गवाक्षेण मातुश्च वस्त्रं ददौ
प्रार्थिने वस्त्रहीनाय वै भिक्षवे।
याचकः सार्थकः स्याद्धि यस्मात्सदा
दानवीरः स नो विश्वनाथात्मजः॥३॥

ध्यानमध्ये हि बाल्ये ददर्श प्रभुं
सुन्दरं मारजिद्विग्रहं गौतमम्।
योगिभिः कांक्षितं निर्विकल्पाख्यकं
शैशवे साधितं येन तस्मै नमः॥४॥

सर्वखेलासु वाद्येषु पाठेषु च
भिन्नभाषासु यस्य प्रवेशो महान्।

* शोधच्छात्रः, संस्कृतविभागस्य, रामकृष्णमिशन्-विद्यामन्दिरस्य, बेलुडमठस्य।

यस्य वाङ्मन्दिरे नर्तकी भारती
तं नरेन्द्रं बुधं नौमि विद्याधरम् ॥५ ॥

ईश्वरो नास्ति वास्तीति जिज्ञासित-
संशयस्योत्तरं सन्न लब्ध्वा ततः।
रामकृष्णादभूद् यस्तु निःसंशयस्-
ते नमो मेऽस्तु सत्यानुसन्धित्सवे ॥६ ॥

रामकृष्णस्य यो मानसो नन्दनो
यो यतीनां पतिर्वाक्पटुस्तीक्ष्णधीः।
यस्त्वधर्मान्धकारस्य सूर्यः स्वयं
ब्रह्मतेजोमयं स्तौमि तेजस्विनम् ॥७ ॥

यस्य वाचस्पतेर्भाषणं सुन्दरं
विश्ववासी विश्रुत्य प्रमुग्धो महान्।
दर्शितं गौरवं भारतीयं महद्
येन तस्मै नमो वीरसन्न्यासिने ॥८ ॥

आत्मनो गौरवं मन्यते किं न स
दुर्लभं भारते यस्य जन्माभवत्।
किन्तु कोऽयं नरेन्द्रो विवेकी महान्
येन धन्या मदीया हि माता स्वयम् ॥९ ॥